# द्वादशः पाठः आदिशङ्कराचार्यः ।

भारतदेशे दीर्घा आचार्यपरम्परा वर्तते । तस्याम् अद्वैतसिद्धान्तस्य भाष्यकारः जगद्गुरुः आदिशङ्कराचार्यः प्रसिद्धः । महान् तत्त्वज्ञः अयं जनप्रबोधनार्थं भारतभ्रमणं कृत्वा भारतस्य चतसृषु दिक्षु पीठानि अस्थापयत्। तेन रचितानि गेयानि अर्थपूर्णानि स्तोत्राणि अद्यापि जनानां मुखेषु विराजन्ते। तस्य जीवनचरित्रात् महत्त्वपूर्णौ द्वौ प्रसङ्गौ अत्र उद्धृतौ।

- यूयं कानि स्तोत्राणि जानीथ ?
- चर्पटपञ्जरिकास्तोत्रस्य रचयिता कः ?
- आदिशङ्कराचार्यस्य कार्यविषये किं जानीथ ?





## प्रथमः प्रसङ्गः ।
## संन्यासार्थम् अनुमतिः प्राप्ता ।

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः। सः ग्रामः पूर्णानदीतीरे वर्तते । तत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत्। तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः। तस्माद् मातैव पुत्रस्य पालनम् अकरोत्। पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान्। गृहं प्राप्य मातृसेवाम् आरभत । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत। शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता ।

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः। नक्रः झटिति तस्य पादम् अगृह्णात्। तदा शङ्करः उच्चैः आक्रोशत् । ''अम्ब! त्रायस्व । नक्रात् त्रायस्व!'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत – ''अम्ब, इतःपरम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् – ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु। मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः । विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् । ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत् । तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।



**द्वितीयः प्रसङ्गः । यस्माद् ज्ञानं लभते स गुरुः ।**

एकस्मिन् दिने आचार्यः शिष्यगणेन सह गङ्गास्नानार्थम् अगच्छत् । तदा मार्गे कोऽपि दरिद्रः मलिनकायः, जीर्णवस्त्रधारी मनुष्यः तस्य पुरतः आगच्छत् । तं दृष्ट्वा शिष्याः तम् 'अपसर, अपसर' इति उच्चैः अवदन् ।

सः मनुष्यः अपृच्छत्–''अपसर, अपसर इति कं वदसि ? शरीरं वा आत्मानं वा ? आत्मा तु परमेश्वरस्य अंशः अतः सर्वेषां समानः एव । तथा च सर्वेषां शरीराणि पञ्चमहाभूतात्मकानि । तर्हि कथं तव शरीरं मम शरीराद् भिन्नम्, अहं च त्वद् भिन्नः ?'' वेदान्ततत्त्वस्य सारं तस्य मुखात् श्रुत्वा आचार्यः तं प्रणनाम । ज्ञानं तु कस्मादपि ग्राह्यम् । यस्माद् ज्ञानं लभते स गुरुरेव इति विचारेण आचार्यः तत्रैव 'मनीषापञ्चकम्' इति स्तोत्रं रचितवान् ।

एवम् आसेतुहिमाचलं पर्यटन् अद्वैत-सिद्धान्तस्य प्रचारम् अकरोत् सः ।

**अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।**
**षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।**

## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत ।**

अ) गुरुमुपगम्य शङ्करः किम् अधीतवान्?
आ) शङ्करः किमर्थम् आक्रोशत्?
इ) शङ्करः मात्रे किं प्रतिश्रुत्य गृहाद् निरगच्छत्?
ई) शङ्करः कस्य शिष्यः अभवत्?
उ) शङ्करः संन्यासदीक्षां गृहीत्वा किम् अकरोत्?
ऊ) शिष्यगणेन सह आचार्यः स्नानार्थं कुत्र अगच्छत्?
ए) शङ्कराचार्यः आसेतुहिमाचलं पर्यटन् किम् अकरोत्?

**२. माध्यमभाषया उत्तरत ।**

अ) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा ?
आ) ज्ञानग्रहणविषये शङ्कराचार्याणां किं मतम्?

**३. प्रश्ननिर्माणं कुरुत ।**

अ) माता आर्याम्बा <u>पुत्रस्य</u> विवाहविषये सदैव चिन्तयति स्म ।
आ) <u>नक्राद्</u> मुक्तः शङ्करः मातुः चरणौ प्राणमत् ।
इ) आचार्यः <u>स्तोत्रं</u> रचितवान् ।

**४. सन्धिविग्रहं कुरुत ।**

(अ) चास्ताम् (आ) त्वत्समीपमागमिष्यामि (इ) गुरुमुपागच्छत् (ई) मुनिरभ्यगात् (उ) मातैव

**५. मेलनं कुरुत ।**

**विशेष्यम्** - शिवगुरुः, आर्याम्बा, शङ्करः, जगत्, मनुष्यः ।
**विशेषणम्** - मलिनकायः, प्रसन्नः, विशालम्, दिवङ्गतः, विरक्तः, चिन्तामग्ना ।

**६.सूचनानुसारं कृतीः कुरुत ।**

अ) सः पठनार्थं गुरुमुपागच्छत् । (बहुवचनं कुरुत ।)
आ) आचार्यः शिष्यगणेन सह गङ्गास्नानार्थं गच्छति स्म । ('स्म' निष्कासयत ।)
इ) मात्रे प्रतिश्रुत्य सः गृहाद् निरगच्छत् । (पूर्वकालकवाचकं निष्कासयत ।)
ई) यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि । (लकारं लिखत ।)
उ) आचार्यः तं प्रणनाम । (लङ्-लकारे परिवर्तयत ।)

**८. समानार्थकशब्दं लिखत**

दिवङ्गतः, शीघ्रम्, चिन्तामग्ना, मग्नः, नक्रः, पादः, पुत्रः, शिष्यः, ईश्वरः, पण्डितः, गृहम् ।

**९. स्थानाधारेण शब्दपेटिकां पूरयत**



(कालडीग्रामः, केरलप्रदेशः, भारतदेशः, आलुवानगरम्, )

**१०. प्रवाहि जालचित्रं पूरयत ।**

शङ्करस्य



(गृहं प्रत्यागमनम्, गुरुमुपगमनम्, मातृसेवा, वेद-वेदाङ्गानाम् अध्ययनम्)

## ११. जालरेखाचित्रं पूरयत ।

अ)




आ)




### आदिशङ्कराचार्यैः रचितं साहित्यम् ।

**स्तोत्राणि –** शिवभुजङ्गप्रयातस्तोत्रम्, शिवपञ्चाक्षरस्तोत्रम्, वेदसारशिवस्तोत्रम्, नारायणस्तोत्रम्, त्रिपुरसुन्दरीस्तोत्रम्, अन्नपूर्णास्तोत्रम्, दक्षिणामूर्तिस्तोत्रम्, द्वादशज्योतिर्लिङ्गम्, कालभैरवाष्टकम्, अच्युताष्टकम्, अम्बाष्टकम्, कृष्णाष्टकम्, गोविन्दाष्टकम्, पाण्डुरङ्गाष्टकम्, गङ्गाष्टकम्, यमुनाष्टकम्, नर्मदाष्टकम्, ललितापञ्चकम् इत्यादीनि ।

**भाष्याणि –** ब्रह्मसूत्रभाष्यम्, उपनिषद्भाष्यम्, भगवद्गीताभाष्यम्, विष्णुसहस्रनामभाष्यम्, सनत्सुजातीयभाष्यम् ।

**अन्यरचनाः –** अपरोक्षानुभूतिः, आत्मबोधः, तत्त्वोपदेशः, प्रौढानुभूतिः, ब्रह्मज्ञानावलीमाला, लघुवाक्यवृत्तिः, सदाचारानुसन्धानम्, स्वात्मनिरूपणम्, अद्वैतानुभूतिः, दशश्लोकी, प्रबोधसुधाकरः, प्रश्नोत्तररत्नमालिका, ब्रह्मानुचिन्तनम्, मोहमुद्गरः, योगतारावलिः, शतश्लोकी, स्वात्मप्रकाशिका, सर्ववेदान्तसिद्धान्तसारसंग्रहः, विवेकचूडामणिः, उपदेशसाहस्री, वेदान्तस्तोत्राणि, अनात्मश्रीविगर्हणप्रकरणम्, आत्मानात्मविचारः, जीवन्मुक्तानन्दलहरी, वाक्यसुधा, अध्यात्मपटलविवरणम् ।

74N6A3